# अथ भूसूक्तम्

भूमिर्भूम्ना द्यौर्वरिणाऽन्तरिक्षं महित्वा । उपस्थे ते देव्यदितेऽग्निमन्नादमन्नाद्यायादधे । आऽयङ्गौः पृश्निरक्रमीदसनन्मातरम्पुनः । पितरञ्च प्रयन्त्सुवः । त्रिँ शद्धाम विराजति वाक्पतङ्गाय शिश्रिये । प्रत्यस्य वह द्युभिः । अस्य प्राणादपानत्यन्त श्चरति रोचना। व्यख्यन्महिषस्सुवः । यत्त्वा क्रुद्धः परोवप मन्युनायदवर्त्या । सुकल्पमग्ने तत्तवपुनस्त्वोद्दीपयामसि । यत्ते मन्युपरोप्तस्य पृथिवीमनुदध्वसे । आदित्या विश्वे तद्देवा वसवश्च समा भरन् ।

मेदिनी देवी वसुन्धरा स्याद्वसुधा देवी वासवी । ब्रह्मवर्चसः पितृणाँ श्रोत्रञ्चक्षुर्मनः। देवी हिरण्यगर्भिणी देवी प्रसोदरी । रसने सत्यायनेसीद । समुद्रवती सावित्री ह नोदेवी मह्यकी । महाधरणी महोर्यतिष्ठा श्रृङ्गे श्रृङ्गेयज्ञे यज्ञे विभीषणी । इन्द्रपत्नी व्यापिनी सुरसरिदिह । वायुमती जल शयनी श्रियँधा राजा सत्यन्धो परिमेदिनी। सो परिधत्तं गाय । विष्णुपत्नीं महीं देवीं माधवीं माधव प्रियाम्। लक्ष्मीप्रियसखीं देवीं नमाम्य च्युत वल्लभाम् ।

ओं धनुर्धरायै विद्महे सर्वसिद्ध्यै च धीमहि । तन्नोधरा प्रचोदयात् ॥